"वरटीदष्टसंस्थानः शोथः संजायते वह्निः ।
सकण्डूस्तोदबहुलः छर्द्दिज्वरविदाहवान् ॥
उदर्द्दमिति तं विद्याच्छीतपित्तमथापरे ।
वाताधिकं शीतपित्तमुदर्द्दस्तु कफाधिकम्" ॥

(अस्य चिकित्सा यथा,
"अभ्यङ्गः कटुतैलेन सेकश्चोष्णाम्बुभिस्ततः ।
उदर्द्दे वमनं कार्य्यं पटोलारिष्टवारिणा" ॥
"सगुड़ं दीप्यकं यस्तु खादेत् पथ्यान्नभुङ्नरः ।
तस्य नश्यति सप्ताहादुदर्द्दः सर्व्वदेहजः" ॥
इति वैद्यकचक्रपाणिसंग्रहे ॥)

उदलावणिकः, त्रि, (उदलवणेन लवणाम्भसा सिद्धः । उदलवण + ठक् ।) लवणोदकसंसिद्धव्यञ्जनादिः । इति हलायुधः ॥

उदवसितं, क्ली, (उदूर्द्धमवसीयते स्म । षो अन्तकर्म्मणि षिञ् बन्धने वा । क्तः । यतिस्यतीतीत्वम् ।) गृहम् । इत्यमरः ॥

उदश्वित्, क्ली, (उदकेन श्वयति वर्द्धते इति । उद + श्वि + क्विप् + तुक् ।) अर्द्धजलयुक्तघोलम् । इत्यमरः ॥ अस्य गुणाः । लेपात् कुष्ठरोगनाशित्वम् । दाहतृष्णासुखशोषनाशित्वञ्च । इति राजवल्लभः ॥
("अर्द्धोदकमुदश्वित्स्यात्" ॥
"उदश्विच्छ्रेष्मलं बल्यं श्रमघ्नं परमं मतम्" ॥
इति हारीते प्रथमस्थानेऽष्टमेऽध्यायः ॥)

उदात्तं, त्रि, (उत् + आ + दा + क्त ।) दयात्यागादिसम्पन्नम् । इति मेदिनी ॥ हृद्यम् । दाढ । महत् । इति हेमचन्द्रः ॥ (यथा, रामायणे २य काण्डे ।)
"उदात्तदन्तानाम् कुञ्जराणाम्" ।
नायकभेदः । यथा साहित्यदर्पणे ३ परिच्छेदे ॥
"अविकत्थनः क्षमावान् अतिगम्भीरो महासत्त्वः ।
स्थेयान् निगूढ़मानो धीरोदात्तो दृढ़व्रतः कथितः" ॥)

उदात्तः, पुं, (उच्चैरादीयते स्म । उत् + आ + दा + क्त ।) स्वरभेदः । स तु वेदगाने उच्चैःस्वरः । इत्यमरः ॥ दानम् । वाद्यविशेषः । इति शब्दरत्नावली ॥ -
काव्यालङ्कारभेदः । इति मेदिनी ॥ (यदुक्तं साहित्यदर्पणे । १० म परिच्छेदे । ११९ ।
"लोकातिशयसम्पत्तिवर्णनोदात्तमुच्यते ।
यद्वापि प्रस्तुतस्याङ्गं महतां चरितं भवेत्" ॥)

उदानः, पुं, (उर्द्धेन आनिति अनेन । उत् + आङ् + अन् + घञ् ।) कण्ठस्थवायुः । इत्यमरः ॥ तस्य कर्म्म ऊर्द्ध्वनयनम् । इति श्रीधरस्वामी ॥
(यथा, सङ्गीतरत्नाकरे, १ । ६४ ।
"उदानः पादयोरास्ते हस्तयोरङ्गसन्धिषु ।
कर्म्मास्य देहोन्नयनोत्क्रमणादि प्रकीर्त्तितम्" ॥)
"ऊर्द्ध्वगमनवान् कण्ठस्थानीयोत्क्रमणवायुः" ।
इति वेदान्तः ॥ (तथा चोक्तम् ।
"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठदेशे स्यात् व्यानः सर्व्वशरीरगः" ॥
"उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः" ।
इति महाभारते वनपर्व्वणि ॥
प्रकुपितोदानस्य लक्षणं यथा ।
"हिक्का श्वासः परिश्वासः कासः शोषार्त्तिघर्घरिकाः ।
हृल्लासो हृदि शूलञ्च यक्ष्मदाहादिका वमिः ।
स्वरयन्त्रस्य भङ्गश्चैव तथा वैस्वर्य्यपीनसौ ॥
अरुचिश्च प्रतिश्याय एते प्रोक्ता उदानतः ।
उदानः श्लेष्मसंयुक्तो दोषात् हृदि प्रकुप्यति" ॥
इति चिकित्सितस्थाने २१ अध्याये हारीतेनोक्तम् ॥ * ॥
"उदानः क्षवथूद्गारच्छर्द्दिनिद्रावधारणैः ।
गुरुभारातिरुदितहास्याद्यैर्विहतो गदान् ॥
कण्ठरोधमनोभ्रंशच्छर्द्दरोचकपीनसान् ।
कुर्य्याच्च गलगण्डादींस्तांस्तान् जत्रूर्द्ध्वसंश्रयान्" ।
इति निदानस्थाने षोड़शेऽध्याये वाभटेनोक्तम् ॥ * ॥
अस्य स्थानं कार्य्यञ्च यथा ॥
"उदानस्य पुनः स्थानं नाभ्युरःकण्ठ एव च ।
वाक्प्रवृत्तिः प्रयत्नोर्ज्जो बलवर्णादि कर्म्म च" ॥
इति चिकित्सास्थाने २८ अध्याये चरकेणोक्तम् ॥
"उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः ॥
तेन भाषितगीतादिविशेषोऽभिप्रवर्त्तते ।
ऊर्द्ध्वजत्रुगतान् रोगान् करोति च विशेषतः" ॥
दोषान्तरगतस्यास्य लक्षणं यथा ॥
"उदाने पित्तसंयुक्ते मूर्च्छादाहभ्रमक्लमाः ।
अस्वेदहर्षौ मन्दाग्निः शीतस्तम्भौ कफावृते" ॥
इति निदानस्थाने प्रथमेऽध्याये सुश्रुतेनोक्तम् ॥
उदरावर्त्तः । नाभिः । सर्पविशेषः । इति मेदिनी ॥ पद्म । इति शब्दरत्नावली ॥

उदारः, त्रि, (उत्कृष्टमासमन्तात् राति । रा + आतश्चेति कः । उदर्य्यते, ऋगतिप्रापणयोः कर्म्मणि घञ् वा ।) दाता । महान् । (यथा गीतायां ७ । १८ ॥
"उदाराः सर्व्व एवैते ज्ञानी त्वात्मैव मे मतम्" ॥
"उदारा महान्तः मोक्षभाज एव इत्यर्थः" ॥
इति श्रीधरस्वामी ।) ऋज्वाशयः । तत्पर्य्यायः । दक्षिणः २ सरलः ३ । इत्यमरः ॥
("क उदारः समर्थश्च त्रैलोक्यस्यापि रक्षणे" ।
इति रामायणे आदिकाण्डे । गभीरः । सारवान् । रम्यः । न्याय्यः ।
"इत्यर्घ्यपात्रानुमितव्ययस्य
रघोरुदारामपि गां निशम्य" ।
इति रघुः ५ । १२ । असाधारणः । सरलाशयः । शिष्टः ।
"स तथेति विनेतुरुदारमतेः
प्रतिगृह्य वचो विससर्ज मुनिम्" । इति रघुः ८ । ९१ ॥)

उदावत्सरः, पुं, संवत्सरादिपञ्चान्तर्गतवत्सरविशेषः । अस्मिन् वर्षे रौप्यदानं महाफलम् । इति विष्णुधर्म्मोत्तरम् ॥

उदावर्त्तः, पुं, (उत् + आङ् + वृत् + घञ् ।) रोगविशेषः । तत्पर्य्यायः । गुदग्रहः २ । इति हेमचन्द्रः ॥ मलमूत्रवायुरोधकरोगः तस्य निदानं संप्राप्तिश्च । यथा निदाने ।
"वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियम् ।
क्षुत्तृष्णोच्छ्वासनिद्राणां धृत्योदावर्त्तसम्भवः" ॥
(अपरञ्चास्य सनिदानसंप्राप्तिकं लक्षणं यथा,—
"कषायतिक्तोषणरूक्षभोज्यैः
सन्धारणाभोजनमैथुनैश्च ।
पक्वाशये कुप्यति चेदपानः
स्रोतांस्यधोगानि बली स रुद्ध्वा ॥
करोति विण्मूत्रसमीरसङ्गं
क्रमादुदावर्त्तमतः सुघोरम् ।
रुग्वस्तिहृत्कुक्ष्युदरेष्वभीक्ष्णं
स पृष्ठपार्श्वेष्वतिदारुणा स्यात् ॥
आध्मानहृल्लासविकर्त्तिकाश्च
तोदोऽविपाकश्च सवस्तिशोथः ।
वर्चोऽप्रवृत्तिर्जठरे च गण्डा-
न्यूर्द्ध्वश्च वायुर्व्विहितो गुदे स्यात् ॥
कृच्छ्रेण शुक्रस्य चिरात्प्रवृत्तिः
स्याद्वा तनुः स्यात् खररूक्षशीता ।
ततश्च रोगा ज्वरमूत्रकृच्छ्र-
प्रवाहिकाहृद्ग्रहणीप्रदोषाः ॥
वम्यान्ध्य-बाधिर्य्य-शिरोऽभिताप-
वातोदराष्ठीलमनोविकाराः ।
तृष्णास्रपित्तारुचिगुल्मकास-
श्वासप्रतिश्यायहितपार्श्वरोगाः ।
अन्ये च रोगा बहवोऽनिलोत्थाः
भवन्त्युदावर्त्तकृताः सुघोराः" ॥
अस्य चिकित्सा यथा,—
"तं तैलशीतज्वरनाशनोक्तैः
स्वेदैर्यथोक्तैः प्रविलीनदोषम् ।
उपाचरेद्वर्त्तिनिरूहवस्ति-
स्नेहैर्विरेकैरनुलोमनान्नैः ॥ * ॥
श्यामात्रिवृन्मागधिकाग्निचूर्णं
गोमूत्रपिष्टं दशभागमाषम् ।
सनीलिकां द्विलवणां गुड़ेन
वर्त्तिं कराङ्गुष्ठनिभां विदध्यात् ॥
पिण्याकसौवर्च्चलहिङ्गुभिर्व्वा
ससर्षपत्र्यूषणयावशूकैः ।
क्रिमिघ्नकम्पिल्लकशङ्खिनीभिः
सुधार्कजक्षीरगुड़ैर्युताभिः ।
स्यात् पिप्पलीसर्षपराठवेश्म-
धूमैः सगोमूत्रगुड़ैश्च वर्त्तिः ॥ * ॥
श्यामाफलेक्षु सपिप्पलीकं
नाड्याथवा तत् प्रधमेत्तु चूर्णम् ।
रक्षोघ्नतुम्बीकरहाटकृष्णा-
चूर्णं सजीमूतकसैन्धवं वा ॥ * ॥
क्षिप्ते गुदे तान्यनुलोमयन्ति
नरस्य वर्चोऽनिलमूत्रसङ्गम् ।
तेषां विघाते तु भिषग्विदध्यात्
स्वभ्यक्तसुस्विन्नतनोर्निरूहम् ॥
ऊर्द्ध्वानुलोमौषधमूत्रतैल-
क्षाराम्ल-वातघ्नयुतं सुतीक्ष्णम् ॥ * ॥
वातेऽधिकेऽम्लं लवणं सतैलं
क्षीरेण पित्ते तु कफे समूत्रम् ।
समूत्रवर्चोऽनिलसङ्गमाशु
गुदं शिरश्च प्रगुणीकरोति ॥ * ॥
त्रिवृत्सुधापत्रतिलादिशाकं
ग्राम्यौदकानूपरसैर्यवान्नम् ।
अन्यैश्च सृष्टानिलमूत्रविड्भि-